॥ ॐ नमो भगवते वासुदेवाय ॥

# श्रीमद् भागवत रसिक कुटुंब

## तुलसी स्तोत्र

श्रीमद् भागवत का यह सार
भगवद् भक्ति ही आधार

# तुलसी स्तोत्र

जगद्धात्रि! नमस्तुभ्यं(म्), विष्णोश्च प्रियवल्लभे ।
यतो ब्रह्मादयो देवाः(स्), सृष्टिस्थित्यन्तकारिणः ॥ 1 ॥

नमस्तुलसि कल्याणि, नमो विष्णुप्रिये शुभे ।
नमो मोक्षप्रदे देवि, नमः(स्) सम्पत्प्रदायिके ॥ 2 ॥

तुलसी पातु मां(न्) नित्यं(म्), सर्वापद्भ्योऽपि सर्वदा ।
कीर्तितापि स्मृता वापि, पवित्रयति मानवम् ॥ 3 ॥

नमामि शिरसा देवीं(न्), तुलसीं(म्) विलसत्तनुम् ।
यां(न्) दृष्ट्वा पापिनो मर्त्या, मुच्यन्ते सर्वकिल्बिषात् ॥ 4 ॥

तुलस्या रक्षितं(म्) सर्वं(ञ्), जगदेतच्चराचरम् ।
या विनिहन्ति पापानि, दृष्ट्वा वा पापिभिर्नरैः ॥ 5 ॥

नमस्तुलस्यतितरां(म्), यस्यै बद्ध्वाञ्जलिं(ङ्) कलौ ।
कलयन्ति सुखं(म्) सर्वं(म्), स्त्रियो वैश्यास्तथाऽपरे ॥ 6 ॥

तुलस्या नापरं(ङ्) किञ्चिद्- देवतं(ञ्) जगतीतले ।
यथा पवित्रितो लोको, विष्णुसङ्गेन वैष्णवः ॥ 7 ॥

तुलस्याः(फ्) पल्लवं(म्) विष्णोः(श्), शिरस्यारोपितं(ङ्) कलौ ।
आरोपयति सर्वाणि, श्रेयां(व्)सि वरमस्तके ॥ 8 ॥

तुलस्यां(म्) सकला देवा, वसन्ति सततं(म्) यतः ।
अतस्तामर्चयेल्लोके, सर्वान् देवान् समर्चयन् ॥ 9 ॥

नमस्तुलसि सर्वज्ञे, पुरुषोत्तमवल्लभे ।
पाहि मां(म्) सर्वपापेभ्यः(स्), सर्वसम्पत्प्रदायिके ॥ 10 ॥

इति स्तोत्रं(म्) पुरा गीतं(म्), पुण्डरीकेण धीमता ।
विष्णुमर्चयता नित्यं(म्), शोभनैस्तुलसीदलैः ॥ 11 ॥

तुलसीश्रीर्महालक्ष्मीर्- विद्याविद्या यशस्विनी ।
धर्म्या धर्मानना देवी, देवीदेवमनः(फ्) प्रिया ॥ 12 ॥

लक्ष्मीप्रियसखीदेवी, द्यौर्भूमिरचला चला ।
षोडशैतानि नामानि, तुलस्याः(ख्) कीर्तयन्नरः ॥ 13 ॥

लभते सुतरां(म्) भक्ति- मन्ते विष्णुपदं(म्) लभेत् ।
तुलसीभूर्महालक्ष्मीः(फ्), पद्मिनीश्रीर्हरिप्रिया ॥ 14 ॥

तुलसि श्रीसखि शुभे, पापहारिणि पुण्यदे ।
नमस्ते नारदनुते, नारायणमनः(फ्) प्रिये ॥ 15 ॥

इति श्रीपुण्डरीककृतं(न्) तुलसीस्तोत्रम् सम्पूर्णम् ॥